सुदर्शनचूर्णं, क्ली, (सुदर्शनं सुदृश्यं चूर्णं यस्य ।) ज्वररोगस्य औषधविशेषः । यथा,—
"त्रिफला रजनीयुग्मं कण्टकारीयुगं शटी ।
त्रिकटु ग्रन्थिकं मूर्व्वा गुड़ूची धन्वयासकः ॥
कटुका पर्पटी मुस्तं त्रायमाणा च वालुकम् ।
निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः ॥
यवानीन्द्रयवौ भार्गी शिग्रुवीजं सुराष्ट्रजा ।
वचा त्वक् पद्मकोशीरचन्दनातिविषाबलाः ॥
शालिपर्णी पृश्निपर्णी विड़ङ्गं तगरं तथा ।
चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम् ॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचना ।
पुण्डरीकञ्च काकोलिपत्रकं जातिपत्रकम् ॥
तालीशपत्रमेतानि समभागानि चूर्णयेत् ।
सर्व्वांशं सर्व्वचूर्णस्य किरातं प्रक्षिपेत् सुधीः ॥
एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम् ।
ज्वरांश्च निखिलान् हन्यान्नात्र कार्य्या विचारणा ॥
पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमज्वरान् ।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत् ॥
शीतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं तृषाम् ।
कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलापि च ॥
त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत् ।
शीताम्बुना पिवेदेतत् सर्व्वज्वरनिवृत्तये ॥
सुदर्शनं यथा चक्रं दानवानां विनाशनम् ।
तद्वज्ज्वराणां सर्व्वेषां चूर्णमेतत् प्रणाशनम् ॥"*
पुष्करमूलाभावे कुष्ठमपि दद्यात् । भार्ग्यभावे कण्टकारीमूलम् । सौराष्ट्र्यभावे स्फुटिकां दद्यात् । तमरालाभे कुष्ठं देयम् । जीवकर्षभयोरभावे विदारीकन्दस्य भागद्वयं दद्यात् । पुण्डरीकं श्वेतकमलम् । काकोल्यभावे अश्वगन्धामूलं दद्यात् । तालीशपत्रकाभावे स्वर्णतालो प्रदीयते इति । अथवा कण्टकारीजटा देया । इति भावप्रकाशः ॥

सुदर्शनद्वीपं, क्ली, (सुदर्शनस्य तन्नाम्ना प्रसिद्धस्य जम्बूवृक्षस्य द्वीपम् ।) जम्बूद्वीपम् । इति पुराणम् ॥

सुदर्शना, स्त्री, (सुखेन दृश्यतेऽसौ । सु + दृश + भाषायां शासियुधीति युच् । टाप् ।) सुदर्शनवृक्षः । सुदर्शनगुलञ्च इति पश्चगुलञ्च इति च ख्यातः । तत्पर्य्यायः । चक्राङ्गी २ वृषकर्णी ३ दक्षानी ४ । इति रत्नमाला ॥ सोमवल्ली ५ मधुपर्णिका ६ चक्राह्वा ७ । अस्या गुणाः । स्वादुत्वम् । उष्णत्वम् । कफशोफास्रवातनाशित्वञ्च । इति भावप्रकाशः ॥ विषनाशित्वम् । इति राजवल्लभः ॥ आज्ञा । ओषधिविशेषः । इति विश्वमेदिन्यौ ॥

सुदर्शनी, स्त्री, (सुष्ठु दर्शनं यस्याः । ङीप् ।) अमरावती । इति विश्वः ॥

सुदलः, पुं, (सुष्ठु दलमस्य ।) चीरमोरटा । इति रत्नमाला ॥

सुदला, स्त्री, (सुष्ठु दलान्यस्याः ।) शालपर्णी । तरुणी । इति राजनिर्घण्टः ॥

सुदान्तः, पुं, (सुष्ठु दान्तः ।) शाक्यमुनिशिष्यविशेषः । इति त्रिकाण्डशेषः ॥ (अतिशयशान्ते, त्रि । यथा, महाभारते ।१।३८।१२ ।
"सुदान्तानपि चैवाहं दद्यामष्टादशापरान् ॥")

सुदामा, [न्] पुं, (सुष्ठु ददातीति । दा + "आतो मनिन्क्वनिब्वनिपश्च ।" ३ । २ । ७४ इति मनिन् ।) मेघः । पर्व्वतः । इति मेदिनी ॥ गोपभेदः । समुद्रः । इति शब्दरत्नावली ॥ ऐरावतः । इति त्रिकाण्डशेषः ॥ श्रीकृष्णशरणागत-विप्रविशेषः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११२ अध्याये ।
"सद्यो जहार दारिद्र्यं सुदाम्नो ब्राह्मणस्य च ।
समागतस्य स्वगृहात् द्वारकां शरणार्थिनः ॥"

सुदामा, [न्] त्रि, (सु + दा + मनिन् ।) सुदाता सुष्ठु ददातीत्यर्थे मन्प्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

सुदामा, स्त्री, नदीविशेषः । यथा, वाल्मीकीये रामायणे अयोध्याकाण्डे ७० सर्गे ।
"स प्राङ्मुखो राजगृहादभिनिर्याय वीर्य्यवान्
ततः सुदामां द्युतिमान् सन्तीर्य्यावेक्ष्य तां नदीम् ॥"

सुदायः, पुं, (सुष्ठु दीयते इति । सु + दा + घञ् युगागमः ।) देययौतकादि । इत्यमरः । २ । ८ । २८ ॥ यथा । यौतकं आदिना उपनयनभिक्षाप्रसादादि च यत् देयं तत् दायहरणपदवाच्यम् । कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तत्र दायादिद्वयमित्यर्थः । युतकं योनिसम्बन्धः तत्र भवमिति अणि यौतकम् । युतयोर्व्वधूवरयोरिदमिति वा अणि यौतकम् । यौतुकमुकारमध्यमपि । यौतकं यौतुकञ्च तत् । इति वाचस्पतिः दीयते दायः कर्म्मणि घञ् सुष्ठु दीयते सुदाय इति पाठ इत्यन्ये । इति भरतः ॥ पितृमातृभर्त्तृकुलसम्बन्धी । यथा,—
"सुदायेभ्यःपितृमातृभर्त्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम् ।" इति दायतत्त्वम् ॥

सुदारुः, पुं, (सुष्ठु दारु यत्र ।) पारिपात्रपर्व्वतः तत्पर्य्यायः । पारिपात्रिकः २ । इति हेमचन्द्रः ॥

सुदि, व्य, शुक्लपक्षः । इति पश्चिमदेशे प्रसिद्धः ॥

सुदिनं, क्ली, (सु दिनम् ।) शुभदिवसः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ४३।४८।५१ ।
"सुदिनं दुर्द्दिनं शश्वत् भ्रमत्येव भवे भव ।
सर्व्वेषां प्राकृतानाञ्च द्वे बीजे सुखदुःखयोः ॥
सुदिनं दुर्द्दिनञ्चैव सर्व्वं कर्म्मोद्भवं भव ।
तत्कर्म्म तपसा साध्यं कर्म्मणाञ्च शुभाशुभम् ॥"

सुदिनाहं, क्ली, (सुदिनेषु शुभदिनेषु अहः शुभदिनम् । यद्वा, सुदिनं प्रशस्तमहः । टच् समासे ।) प्रशस्तदिनम् । यथा । उत्तमैकाभ्याञ्च । आभ्यामह्नादेशो न । उत्तमशब्दः अन्त्यार्थः पुण्यशब्दमाह । पुण्यैकाभ्यामित्येव सूत्रयितुमुचितम् । पुण्याहम् । सुदिनाहम् । सुदिनशब्दः प्रशस्तवाची । इति सिद्धान्तकौमुदी ॥

सुदीर्घः, त्रि, (सुष्ठु दीर्घः ।) अतिविस्तारः । यथा,—
"विवाह्य श्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च ।
सुदीर्घेणापि कालेन तेषां तत्तु न सिध्यति ॥"
इति व्यवहारतत्त्वम् ॥

सुदीर्घघर्म्मा, स्त्री, (सुदीर्घः अतिशयः घर्म्मो यस्याः ।) असनपर्णी । इति शब्दचन्द्रिका ॥

सुदीर्घफलिका, स्त्री (सुदीर्घं फलं यस्याः । कप् । टापि अत इत्वम् ।) वार्त्ताकुविशेषः । इति रत्नमाला ॥ शिङ्गा वेगुन इति भाषा ॥

सुदीर्घा, स्त्री, (सुष्ठु दीर्घा ।) चीनाकर्कटी । इति राजनिर्घण्टः ॥

सुदुःखितः, त्रि, (सुष्ठु दुःखितः ।) अतिशयव्यथितः । यथा । ज्योतिस्तत्त्वे भीमपराक्रमवचनम् ।
"विष्णुभाद्ये त्रिके चित्रे ज्येष्ठायां ज्वलने यमे ।
एभिर्व्विवाहिता कन्या भवत्येव सुदुःखिता ॥"

सुदुर्लभः, त्रि, (सु + दुर् + लभ + खल् ।) अतिदुष्प्राप्यः । यथा,—
"ब्रह्मत्वादपि देवत्वादिन्द्रत्वादमरादपि ।
अमृतात् सिद्धिलाभाच्च हरिदास्यं सुदुर्लभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ९७अध्यायः ॥

सुदुश्चरः, त्रि, (सु + दुर् + चर + खल् ।) अतिशयदुःखेनाचरणीयः । यथा, श्रीभागवते ११ । २९ । १ ।
"सुदुश्चरामिमां मन्ये योगचर्य्यामनात्मनः ।
यथाञ्जसा पुमान् सिध्येत् तन्मे ब्रूह्यञ्जसाच्युत ॥"
(कार्त्तिकेये, पुं, । यथा, महाभारते । ३ । २३१ । ७ ।
"प्रभुर्नेता विशाखश्च नैगमेयः सुदुश्चरः ॥")

सुदुष्करः, त्रि, (सु + दुर् + कृ + खल् ।) अत्यन्तक्लेशकरः । यथा, श्रीभागवते । ४ । ८ । ६९ ।
"सुदुष्करं कर्म्म कृत्वा लोकपालैरपि प्रभुः ।
एष्यत्यचिरतो राजन् यशो विपुलयंस्तव ॥"

सुदुस्तरः, त्रि, (सु + दुर् + तॄ + खल् ।) अतिदुःखेन तरणीयः । यथा, श्रीभागवते । १० । २ । ३१ ।
"स्वयं समुत्तीर्य्य सुदुस्तरं द्युमन्
भवार्णवं भीममदभ्रसौहृदाः ।
भवत्पदाम्भोरुहनावमत्र ते
निधाय याताः सदनुग्रहो भवान् ॥"

सुदुस्त्यजः, त्रि, (सु + दुर् + त्यज + खल् ।) अतिदुःखेन त्याज्यः । यथा,—
"त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्
वन्दे महापुरुष ते चरणारविन्दम् ॥"
इत्यात्मिकतत्त्वधृतश्रीभागवतवचनम् ॥